# A-II/1/1410/22

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. एतेषां प्रश्नानामति लघूनि उत्तराणि लिखत।** **(15×2=30)**

1. आकृतिवादारम्भस्य किमुद्देश्यम्?
2. सत्तादिसामान्येषु सामान्यमित्येकबुद्धिकारणं किम्?

**अथवा**

सामान्यं कुत्र तिष्ठति?

3. अपोहवादेन वार्तिककार: किं साधयति?
4. अपोहवादिमते गोत्वं किं रूपम्?
5. अब्राह्मणशब्देन किं सामान्यं प्रतिपादितम्?
6. अपोह्यभेदादपोहभेदस्वीकारे को दोष:?

**अथवा**

वासनाभेदादपोहभेदं निराकुरुत।

7. अपोहवतो वस्तुनो वाच्यत्वे को दोष:?

**अथवा**

कीदृश: नञ् न प्रतिषेधक:?

8. सास्नादिविशिष्टा आकृति: इत्यत्र आकृते: सास्नादिविशिष्टत्वं कथम्?
9. स एष यज्ञायुधीत्यादिवाक्यस्य कोऽर्थ:?

**अथवा**

पूर्वमीमांसा शास्त्रे आत्मनिरूपणस्य का आवश्यकता?

10. बौद्धमते क: आत्मा?
11. प्राणादे: देहधर्मत्वं कुतो न भवति?

12. ममात्मा इति आत्मनि अस्मच्छब्दार्थभेदः कथमुपपादनीयः?

**अथवा**

मोक्षस्य उपायः कः?

13. मोक्षस्य किं स्वरूपम्?

14. अवयवानां जातिव्यञ्जकत्वे को दोषः?

15. वनमित्यस्य कोऽर्थः?

**ब. एतेषां प्रश्नानां लघूनि उत्तराणि लिखत।** **(5×6=30)**

16. सप्रसङ्गं व्याख्यात –

"नैरात्मयेनात्र चाक्षिप्ताः सर्वा एव हि चोदनाः" इति।

17. ईश्वरस्य जगत्स्रष्टृत्वं निराकुरुत।

**अथवा**

वनवादसारं संगृह्णीत।

18. चित्सन्तानस्य आत्मत्वं निराकुरुत।

**अथवा**

चित्राक्षेपमुपन्यस्य परिहरत।

19. अद्वैताभिमतसृष्टिप्रक्रियां निराकुरुत।

**अथवा**

आकृतेः सर्वगतत्वेऽपि व्यक्तिष्वेव अभिव्यक्तिमुपपादयत।

20. आत्मविषयकवेदवाक्यानि उद्धृत्य तेषां परस्परं विरोधं परिहरत।

**स. अस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. सृष्टिप्रलयौ निराकुरुत।

**अथवा**

आकृतिवादस्य सारं लिखत।

**अथवा**

मोक्षस्वरूपोपाययोर्विषये निबन्धमेकं लिखत।

# A-II/2/1411/22

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. एतेषां प्रश्नानां लघूत्तराणि लिखत।** **(15×2=30)**

1. किं नाम पारार्थ्यम्?
2. अङ्गाङ्गिभावबोधकानि षट् प्रमाणानि कानि?
3. बादरिमते के शेषलक्षणलक्ष्याः?
4. चमसपदार्थं निरूप्य क्रतौ तस्य उपयोगं प्रदर्शयत।
5. अभिक्रमणस्य अङ्गाङ्गिभावं सप्रमाणं निरूपयत।
6. अवचरशब्दार्थं ग्रन्थोक्तरीत्या व्याख्यात।
7. अरुणाधिकरणे विषयवाक्यार्थः निरूप्यताम्।
8. प्रत्युदाहरणसङ्गतिं सोदाहरणं निरूपयत।

**अथवा**

तेषामर्थाधिकरणे संशयशरीरं प्रदर्शयत।

9. ग्रहैकत्वाधिकरणे विषयवाक्यस्य उद्देशविधेयभावं दर्शयत।

**अथवा**

लिङ्गेन विनियोगम् उदाहरत।

10. शब्दभावनायाः त्रीन् अंशान् दर्शयत।

**अथवा**

सम्मीलनादि धर्माविधिं प्रर्दायत।

11. उपवीताधिकरणस्य उपक्रमे सङ्गतिं निर्दिशत।

**अथवा**

पदैकवाक्यतायाः स्वरूपं निर्दिशत।

12. खण्डदेवत्रयी का ?

**अथवा**

विभक्तिरूपां श्रुतिं विवृणुत।

13. वार्त्रघ्न्यधिकरणस्य विषयवाक्यं लिखत।

14. चतुर्थीश्रुत्या विनियोगं दर्शयत।

15. श्रुतिलिङ्गयोः विरोधे किमुदाहरणम् ?

**ब. अधो निर्दिष्टप्रश्नानां विवरणात्मकमुत्तरं लिखत।** **(5×6=30)**

16. 'अथातः शेषलक्षणम्' सूत्रार्थः वर्ण्यताम्।

17. श्रुत्या विनियोगप्रकाराः निरूप्यन्ताम्।

**अथवा**

बादरिमतनमूद्य स्वमतं स्थापयत।

18. तेषामर्थाधिकरणे धर्मा अव्यवस्थिताः उत व्यवस्थिताः? विवेचयत।

**अथवा**

ग्रहैकत्वाधिकरणसारः प्रदर्शनीयः।

19. सूक्तवाकस्य विभज्य कथं विनियोग इति व्याख्यात।

**अथवा**

अभिक्रमणस्य प्रयाजाङ्गत्वं साधयत।

20. विनियोगविधिं वर्णयत।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** **(1×20=20)**

21. अरुणाधिकरणम्।

**अथवा**

अङ्गाङ्गिभावबोधकप्रमाणानि।

**अथवा**

श्रुतिलिङ्गयोः बलाबलविमर्शः।

# A-II/3/1412/22

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. एतेषां प्रश्नानामतिलघूनि उत्तराणि लिखत।** **(15×2=30)**

1. भाट्टरहस्यमङ्गलश्लोकं लिखत।
2. खण्डदेवाचार्यस्य तिस्रः कृतयः काः?
3. भावना कतिविधा? कथम्?
4. प्रवृत्तिकारणं किम्?
5. शाब्दबोधे मुख्यविशेष्यं किम्?
6. वर्तमानकालः कस्यार्थः?
7. धात्वर्थस्य भावनायां कथमन्वयः?

**अथवा**

भावनाप्राधान्यबोधकं निरुक्तवचनं लिखत।

8. बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवृत्तिप्रयोजकत्वं कुतो न?

**अथवा**

विधौ के लकारा भवन्ति?

9. धर्ममीमांसातो ब्रह्मीमांसायाः कथं भेदः?

**अथवा**

ब्रह्मज्ञानस्य धर्मत्वमिष्यते न वा?

10. तामसधर्मः कः?
11. ज्ञानस्य कुतो न विधेयत्वम्?
12. लिङ्विधायकं सूत्रं लिखत।
13. मण्डनमिश्रमते धात्वर्थः कः?

**अथवा**

अभ्यनुज्ञाविधेरुदाहरणं किम्?

14. मण्डलीकरणादौ प्रवृत्तिः कुतो न?

15. धर्मः क्षरति कीर्तनादित्यस्य कोऽर्थः?

**ब. एतषां प्रश्नानां लघूनि उत्तराणि लिखत।** **(5×6=30)**

16. अभ्यनुज्ञाविधिविषयस्य धर्मत्वापत्तिं तद्वारणं च दर्शयत।

17. शब्दभावनाया अंशत्रयं निरूपयत।

**अथवा**

चैत्रो ग्रामं गच्छतीत्यस्य वाक्यस्य शाब्दबोधं वर्णयत।

18. इष्टसाधनत्वादेरन्यलभ्यत्वं साधयत।

**अथवा**

बलवदनिष्टाननुबन्धित्वस्वरूपं विचारयत।

19. विधिनिमन्त्रणेत्यादिसूत्रं विलिख्यं व्याख्यात।

20. श्येनादेर्धर्मत्वमस्ति न वेति विचारयत।

**अथवा**

लकारार्थान् तदन्वयं च दर्शयत।

**स. एतस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. धात्वर्थविचारं प्रस्तुवत।

**अथवा**

अर्थवादलक्ष्ययोः प्राशस्त्याप्राशस्त्ययोः स्वरूपं तदन्वयप्रकारं च दर्शयत।

**अथवा**

आख्यातार्थं विचारयत।

# A-II/4/1413/22

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. एतेषां प्रश्नानामतिलघूनि उत्तराणि लिखत।** **(15×2=30)**

1. अथातो दर्शपूर्णमासौ इत्यादि सूत्रं विलिख्य संक्षेपेण तदर्थं लिखत।
2. प्रात: पदार्थ: क: ?
3. परिधय: कस्य वृक्षस्य भवन्ति ?

**अथवा**

मध्यमादिपरिधीनामाकरान् निर्दिशत।

4. इध्मप्रव्रश्चनानि नाम कानि ?

**अथवा**

किं नाम शुल्बम् ?

5. पौर्णमास्यमावास्ययोरङ्गानामारम्भ: कदा ?
6. दोहने कतीनां गवां समन्त्रकं दोहनम् ? कतीनां तूष्णीम् ?
7. गतश्रिय: के ?

**अथवा**

असोमयाजिनं सान्नाय्य: भवति न वा ?

8. किं नाम मेक्षणम् ?

**अथवा**

किं नाम कशिपु ?

9. को नाम प्रस्तर: ?
10. न गतिश्रयोऽन्यमग्निं प्रणयतीति सूत्रस्य कोऽर्थ: ?
11. शाखाच्छेदने संनमते च को मन्त्र: ?

12. कस्यां दिशि विद्यमाना शाखा छेदनीया ?

13. असिदस्य प्रतितपनं कस्मिन्नग्नौ कार्यम् ?

14. कस्याः दिशः बर्हिराहर्तव्यम् ?

15. पिण्डपितृयज्ञसय कालद्वयं किम् ?

**अथवा**

पिण्डपितृयज्ञे कथं पात्रसादनम् ?

**ब. एतेषां प्रश्नानां लघूनि उत्तराणि लिखत।** **(5×6=30)**

16. कपालोपधानप्रकारं वर्णयत।

**अथवा**

वेदिनिर्माणप्रकारं वर्णयत।

17. सान्नाय्यपात्राणि कानि ? तेषां साधनं कथं कार्यम् ?

**अथवा**

गोदोहनप्रकारं वर्णयत।

18. व्रीहीणां यवानां च निर्वापप्रकारं वर्णयत।

19. अपां प्रणयनप्रकारं वर्णयत।

20. बर्हिः कथमाहर्तव्यमिति विवृणुत।

**अथवा**

इध्मघटकानां दारुणामुपयोगं निर्दिशत।

**स. एतस्य दीर्घमुत्तरं लिखत।** **(1×20=20)**

21. संक्षेपेण दर्शयागानुष्ठानप्रकारं वर्णयत।

**अथवा**

दर्शस्य पूर्वदिनकृत्यं वर्णयत।

**अथवा**

दर्शपूर्णमासवेदिप्रकारं यागोपयुक्तोपकरणानां परिचयं च लिखत।

# A-II/5/1414/22

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. एतेषां प्रश्नानामतिलघूनि उत्तराणि लिखत।** **(15×2=30)**

1. भाट्टतन्त्ररहस्यं कस्य कृतिः ?
2. आपस्तम्बरचिता ग्रन्थाः के ?
3. पार्थसारथिमिश्रस्य ग्रन्थाः के ?
4. तन्त्ररहस्यं कस्य ग्रन्थः ?

**अथवा**

तन्त्ररहस्यं कस्य प्रस्थानस्य ग्रन्थः ?

5. सायणाचार्यः कस्य राज्ञो मन्त्री अभूत् ?

**अथवा**

जैमिनीयन्यायमालायां प्रायः कति श्लोकाः ?

6. श्लोवार्तिकं कस्य व्याख्यारूपम् ?

**अथवा**

मीमांसाभाष्यकारः कः ?

7. मीमांसाया आद्यः प्रवर्तकः कः ?
8. श्रौतसूत्रस्य भाष्यं केन रचितम् ?
9. मीमांसाशास्त्रे शाब्दबोधपरग्रन्थः कः ?

**अथवा**

तत्त्वबिन्दुः कस्य ग्रन्थः ?

10. न्यायकणिका कस्य व्याख्या ?

**अथवा**

विधिविवेकः केन रचितः ?

11. अध्वरमीमांसाकुतूहलवृत्तिः केन रचिता ?

12. भाट्टतन्त्ररहस्यस्य व्याख्यानमेकं निर्दिशत।

13. मीमांसायाः त्रीणि प्रस्थानानि कानि ?

14. खण्डदेवाचार्येण भाट्टदीपिका कस्यात्पादादारब्धा ?

15. जैमिनेः आचार्यः कः ?

**ब. एतेषां प्रश्नानां लघूनि उत्तराणि लिखत।** **(5×6=30)**

16. जैमिनेः देशकालौ विचारयत।

17. भाट्टमतस्य पञ्चानां ग्रन्थानां परिचयं लिखत।

**अथवा**

प्राभाकरमतस्य पञ्चानां ग्रन्थानां परिचयं लिखत।

18. मण्डनमिश्रस्य इतिहासं लिखत।

19. माधवाचार्यस्य वैशिष्ट्यं वर्णयत।

**अथवा**

मुरारिमिश्रस्य तद्ग्रन्थस्य च वैशिष्ट्यं वर्णयत।

20. आपदेवस्य इतिवृत्तं लिखत।

**अथवा**

वासुदेवदीक्षितस्य परिचयं लिखत।

**स. एतस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. मीमांसाया भाट्टप्रस्थानस्य उत्पत्तिविकासौ वर्णयत।

**अथवा**

पार्थसारथिमिश्रस्य इतिहासं प्रभावं च वर्णयत।

**अथवा**

अप्पय्यदीक्षितस्य इतिवृत्तं मीमांसाशास्त्रे योगदानं च वर्णयत।